# अथ हलन्तस्त्रीलिङ्गप्रकरणम्

**११०. नहो धः ८/२/३४**

नहो हस्य धः स्याज्झलि पदान्ते च।

**१११. नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ६/१/११६**

क्विबन्तेषु परेषु पूर्वपदस्य दीर्घः स्यात्। उपानत्, उपानद्। उपानहौ। उपानत्सु।
क्विबन्तात् कुत्वेन घः। उष्णिक्, उष्णिग्। उष्णिहौ। उष्णिहः। उष्णिग्भ्याम्।
द्यौः। दिवौ। दिवः। द्युभ्याम्। गीः। गिरौ। गिरः। एवं पूः। चतस्रः। चतसृणाम्। का। के। काः। सर्वावत्।

**११२. यः सौ ७/२/११०**

इदमो दस्य यः स्यात् सौ। इयम्। त्यदाद्यत्वम्। पररूपत्वम्। टाप्। दश्चेति मः। इमे। इमाः। इमाम्। अनया।
हलिलोपः। आभ्याम्। आभिः। अस्यै। अस्याः - २। अनयोः२। आसाम्। अस्याम्। आसु। त्यदाद्यत्वम्। टाप्। स्या। त्ये। त्याः। एवं तद्, यद्, एत-दित्यादयः। वाक्-वाग्। वाचौ। वाचः। वाग्भ्याम्। वाक्षु। अप्शब्दो: नित्यं बहुवचनान्तः। अप्तृन्निति दीर्घः। आपः। अपः।

---

**११०.** अस्मिन् सूत्रे 'हो ढः' इत्यतः ह इत्यनुवर्तते। 'पदस्य' अधिकृतम्। 'स्कोः संयोगाद्योरन्ते च' इत्यतः अन्ते चानुवर्तते। 'झलो झलि' इत्यतः झलि। तदा सूत्रस्यास्य अयमर्थः - नह् शब्दे यो हकारः तस्य ध कारादेशः स्यात् झलि परे तथा च पदान्ते।

**१११.** सूत्रार्थः स्पष्ट एव।

**उपानत्** = उप पूर्वकात् नह् धातोः क्विपि सर्वापहारिलोपे 'नहिवृतिवृषिव्यधि रुचिसहितनिषु क्वौ' इत्यनेन उप इत्यकारस्य दीर्घे उपानह् इति प्रातिपदिकात् सौ तस्य हल्ङ्यादिलोपे 'नहो धः' इति सूत्रेण हस्य धकारे जश्त्वे विकल्पेन चर्त्वे 'उपानत्' इति। चर्त्वाभावे 'उपानद्' इति। पादत्राणम् इत्यर्थः।

**उपानत्सु** = उपानह् इत्यस्मात्प्रातिपदिकात् सप्तमीबहुवचने सुपि 'नहो धः' इति हकारस्य ध कारादेशे 'खरि च' इति चर्त्वे 'उपानत्सु'।

**उष्णिक्** - छन्दो विशेषः। उत् पूर्वकात् स्निह् (ष्णिह्) धातोः क्विन्नन्तनिपातनात् सिद्धस्य उष्णिह् शब्दस्य प्रातिपदिकसंज्ञायां सौ तस्य हल्ङ्यादिलोपे 'क्विन्प्रत्ययस्य कुः' इति हकारस्य कुत्वेन घकारे जश्त्वे विकल्पेन चर्त्वे 'उष्णिक्' इति। चर्त्वाभावे 'उष्णिग्' इति।

**उष्णिग्भ्याम्** = उष्णिह् शब्दात् प्रातिपदिकात् भ्यामि 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां पदान्तत्वात् कुत्वेन हकारस्य घकारे जश्त्वे च उष्णिग्भ्याम् इति सिद्धम्।

**द्यौः** = दिव् शब्दात् प्रातिपदिकत्वात् सौ अनुबन्धलोपे 'दिव ओत्' इति वकारस्य औत्वे दि औ स् इति जाते यणि सस्य रुत्वे विसर्गे 'द्यौः' इति।

**चतस्रः** = स्त्रीत्वविवक्षायां चतुर्शब्दात् प्रथमायाः बहुवचने जसि अनुबन्धलोपे 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति चतुरः स्थाने चतसृआदेशे यणि सस्य रुत्वे विर्से 'चतस्रः' इति।

**चतसृणाम्** = चतुर् प्रातिपदिकात् आमि चतुरः स्थाने चतसृ आदेशे रेफादेशं प्रबाध्य 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन 'इति वार्तिकनियमात् नुटि अनुबन्धलोपे 'नामि' इति प्राप्तस्य दीर्घस्य 'न तिसृचतसृ' इत्यनेन निषेधे 'ऋर्णान्नस्य णत्वं वाच्यम्' इति वार्तिकेन णत्वे 'चतसृणाम्'।

**११२.** 'इदमो मः' इत्यतः इदमः 'दश्च' इत्यतो दः इत्यनुवर्तते। तदाह सूत्रार्थः -सु विभक्तिपरतः इदम् शब्दस्य यो दकारः तस्य स्थाने यादेशः स्यात्।

**इयम्** = इदम् शब्दात् प्रातिपदिकात् सौ 'त्यदादीनामः' इति अत्वं प्रबाध्य'इदमो मः' इति मत्वे

**११३. अपो भि: ७/४/४८**

अपस्तकार: स्याद् भादौ प्रत्यये परे। अद्भि:। अद्भ्य:। अद्भ्य:। अपाम्। अप्सु। दिक्-दिग्। दिशौ। दिश:। दिग्भ्याम्। त्यादिष्विति दृशे: क्विन् विधानादन्यत्रापि कुत्वम्। दृक्-दृग्। दृशौ। दृग्भ्याम्। त्विट्, त्विड्। त्विषौ।त्विड्भ्याम्। ससजुषोरुरिति रुत्वम्। सजू:। सजुषौ। सजूर्भ्याम्। आशी:। आशिषौ। आशीर्भ्याम्। असौ। उत्वमत्वे। अमू२। अमुया। अमूभ्याम्३। अमूभि:। अमुष्यै। अमुभ्य:। अमुष्या:२। अमुयो:२। अमूषाम्। अमुष्याम्। अमूषु।

।। इति हलन्तस्त्रीलिङ्गप्रकरणम्।।

---

'य: सौ' इति दस्य यकारे हल्ङ्यादिलोपे 'इयम्'।

**अनया** = इदम् शब्दस्य प्रातिपदिकसञ्ज्ञायां टा विभक्तौ त्यदाद्यत्वे पररूपे इद आ इति जाते स्त्रीत्वविवक्षायां टापि सवर्णदीर्घे इदा आ इति स्थिते 'अनाप्यक:' इति इद्भागस्य अनादेशे 'आङि चाप:' एत्वे अयादेशे 'अनया' इति।

**अस्या:** – इदम् शब्दात् प्रातिपदिकात् ङसि अनुबन्धलोपे त्यदाद्यत्वे, पररूपे टापि सवर्णदीर्घे 'सर्वनाम: स्याड्ढ्रस्वश्च' इत्यनेन स्याडागमे ह्रस्वे च कृते 'हलिलोप:' इति इद् भागस्य लोपे सवर्णदीर्घे सस्य रुत्वे विसर्गे च 'अस्या:' इति।

**स्या** – त्यद् शब्दात् प्रातिपदिकत्वात् सु विभक्तौ अत्वे पररूपे स्त्रीत्वविवक्षायां टापि सवर्णदीर्घे 'तदो: स: सावनन्त्ययो:' इत्यनेन आदौ स्थितस्यतकारस्य सकारे सुलोपे 'स्या' इति।

**वाक्षु** – वाच् शब्दात् प्रातिपदिकात् सप्तमीबहुवचने सुपि 'स्वादिष्वसर्वनामस्थाने' इति पदसञ्ज्ञायां कुत्वे 'आदेशप्रत्यययो:' इत्यनेन सस्य षत्वे क् षसंयोगे क्षत्वे 'वाक्षु' इति सिद्धम्।

**आप:** – अप् शब्दात् जसि अनुबन्धलोपे 'अप्तृन्तृच्.' इत्यादिना सूत्रेण अप: अकारस्य दीर्घे सस्य रुत्वे विसर्गे च 'आप:'।

**११३.** 'अच उपसर्गात्त:' इत्यतो त इत्यनुवर्तते। इदं सूत्रम् अङ्गाधिकारे अस्ति।

**सरलार्थ:** – भकारादिप्रत्यये परे अङ्गरूपस्य अप: पकारस्य स्थाने तकारादेश: स्यात्।

**अद्भि:** – अप् शब्दात् प्रातिपदिकात् तृतीयाया: बहुवचने भिस् प्रत्यये 'अपो भि' इत्यनेन पकारस्य तकारादेशे जश्त्वे सस्य रुत्वे विसर्गे च कृते 'अद्भि:' इति।

**दिक्-दिग्** – दिश् धातो: 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इत्यनेन क्विनि तस्य सर्वापहारिलोपे दिश् शब्दात् प्रातिपदिकत्वात् सौ तस्य हल्ङ्यादिलोपे ''व्रश्चभ्रस्जसृजमृज.'' इत्यादिना शस्य षकारे जत्वेन डकारे 'क्विन्प्रत्ययस्य कु:' इति कुत्वेन डकारस्य गकारे विकल्पेन चर्त्वे 'दिक्' इति। चर्त्वाभावे 'दिग्' इति।

**सजू:** = सजुष् शब्दात् प्रातिपदिकात् सौ तस्य हल्ङ्यादिलोपे 'ससजुषो रु:' इति षस्य रुत्वे अनुबन्धलोपे 'र्वोरुपधाया दीर्घ इक:' इति उकारस्य दीर्घे रेफस्य विसर्गे 'सजू:' इति।

**आशीर्भ्याम्** – आशिष्शब्दात् प्रातिपदिकसंज्ञायां भ्याम् प्रत्यये ''स्वादिष्वसर्वनामस्थाने'' इति पदसंज्ञायां षत्वस्य असिद्धत्वात् सस्य रुत्वे ''र्वोरुपधाया दीर्घ इक:'' इति दीर्घे सिद्धम्।

**अमू** = अदस् शब्दात् प्रातिपदिकात् औ विभक्तौ अत्वे पररूपे च अद औ इत्यवस्थायां टापि सवर्णदीर्घे 'प्रथमयो: पूर्वसवर्ण:' इति पूर्वसवर्णदीर्घे 'अदसोऽसेर्दादु दो म:' इति दकारस्य मकारे आकारस्य च ऊत्वे 'अमू' इति।

**अमूभ्याम्** = अदस् शब्दात् भ्यामि त्यदाद्यत्वे 'अतो गुणे' इति पररूपे टापि सवर्णदीर्घे 'अदसोऽसेर्दादु दो म:' इति ऊत्वे मत्वे च कृते 'अमूभ्याम्' इति सिद्धम्।

**अमुष्यै** = अदस् शब्दात् चतुर्थ्येकवचने ङे विभक्तौ अनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे च टापि सवर्णदीर्घे 'सर्वनाम्न: स्याड्ढ्रस्वश्च' इति स्याडागमे आपो ह्रस्वे च कृते 'वृद्धिरेचि' इति वृद्धौ अदस्यै इति स्थिते उत्वे मत्वे च कृते 'आदेशप्रत्यययो:' इति षत्वे 'अमुष्यै' इति।

**।। इति हलन्तस्त्रीलिङ्गप्रकरणम् ।।**